# E-Text

पत्रस्य नाम : लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्)

पत्रसंख्या : V

पाठ्यांशनाम : स्थानिवदादेशोऽनल्विधौ, न पदान्त

पाठ्यांशसंख्या : 8

पाठ्यांशस्य मुख्याः अंशाः :

1) अचः परस्मिन् इत्यत्र पूर्वविधिशब्दे भावसाधनत्वं वा कर्मसाधनत्वं वेति विचारः।
2) पूर्वत्वं व्यवहिताव्यवहितसाधारणम्।
3) न पदान्तसूत्रम् उदाहरणानि।
4) सूत्रे द्विर्वचनसवर्णादिग्रहणस्य प्रयोजनम्।

विषयसूची


1.0 : उपोद्घातः

1.1 : अचः परस्मिन् इत्यत्र पूर्वविधिशब्दे भावसाधनत्वं वा कर्मसाधनत्वं वेति विचारः

2.0 : पूर्वत्वं व्यवहिताव्यवहितसाधारणम्

3.0 : न पदान्तसूत्रम् उदाहरणानि

4.0 : सूत्रे द्विर्वचनसवर्णादिग्रहणस्य प्रयोजनम्



Pathshala
पाठशाला
A Gateway to all Post Graduate Courses

1.0 उपोद्घातः

अचः परस्मिन् पूर्वविधौ इति सूत्रे अचः, परस्मिन्, पूर्वविधौ इत्येषां पदानां सार्थक्यम्, भावाभावयोरुभयोरप्यतिदेश इत्यादिकं पूर्वपाठे विचारितम्। पूर्वविधिशब्देन पूर्वपरसम्बन्धी विधिः न गृह्यते किन्तु पूर्वस्यैव सम्बन्धी विधिः ग्राह्य इति च पठितम्। इदानीम् एकेन विधिशब्देन कर्मसाधनविधिशब्दो भावसाधनविदिशब्दश्च तन्त्रेण निर्दिष्ट इत्यादि प्रदर्श्यते।

पूर्वविधिशब्दे पूर्वशब्दश्रवणे आकाङ्क्षा जायते कस्मात् पूर्वस्य विधाविति। तत्र यदि अच्पदं पञ्चम्यन्ततया पूर्वस्येत्यत्रापि सम्बध्यते, षष्ठ्यन्ततया आदेश इत्यत्रापि तर्हि , परनिमित्तकः अचः आदेशः स्थानिवत् स्यात् स्थानिभूतादचः पूर्वस्य विधौ कर्तव्ये - इत्येवं सूत्रार्थः सम्पद्यते। तदा आयन् आसन् धिन्वन्ति कृण्वन्ति इत्यादौ स्वविधौ स्थानिवद्भावो न सिध्येत् इति दोषे उक्ते - अयं विधिशब्दोऽस्त्येव कर्मसाधनो विधीयते विधिरिति, अस्ति च भावसाधनो विधानं विधिरिति, तत्र कर्मसाधनस्य विधिशब्दस्योपादाने न सर्वमिष्टं सङ्गृहीतमिति कृत्वा भावसाधनस्य विधिशब्दस्योपादानं विज्ञास्यते -पूर्वस्य विधानं प्रति -पूर्वस्य भावं प्रति - पूर्वः स्यादिति - इति समाहितं भाष्ये। तत्र कैयटेनोक्तं - भावसाधन एव विधिशब्दो व्यापकत्वादाश्रीयते, पूर्वस्येति च षष्ठी सम्बन्धसामान्ये विज्ञायते। - इति। अत्र भावसाधन एव इत्येवकारेण कर्मसाधनस्य विधिशब्दस्य ग्रहणं नास्तीति प्रतीयते। परन्तु कर्मसाधनोऽपि ग्राह्य इति नागेशमतम्। तथाहि-

**1.1 अचः परस्मिन् इत्यत्र पूर्वविधिशब्दे भावसाधनत्वं वा कर्मसाधनत्वं वेति विचारः**

**शेखरे – वस्तुतोऽत्र पूर्वविधिशब्दे तन्त्रम्। एकस्योक्तोऽर्थः। द्वितीये भावे किः। सम्बन्धसामान्यषष्ठ्यन्तपूर्वशब्देन समासः। विधिः भावः। पूर्वसम्बन्धिभावे तत्स्थितौ स्थानिवदित्यर्थः।**

सूत्रकृता पूर्वविधिशब्दः तन्त्रेण उच्चारितः। एकेन उच्चारणेन बह्वर्थपरतासम्पादनेच्छा भवति तन्त्रम्। प्रकृते, पूर्वस्य विधिः पूर्वविधिः - इत्येव विग्रहः। परन्तु यदा विधिशब्दे किप्रत्ययो भावार्थकः तदा तदनुरोधेन पूर्वस्येति कर्तरि षष्ठी। पूर्वकर्तृको विधिरित्यर्थः। विधिशब्दस्य भवनमित्यर्थः। धात्वर्थस्याविवक्षितत्वात्। तथाच पूर्वकर्तृकं भवनमित्यर्थः। यदा विधिशब्दे किप्रत्ययः कर्मार्थकः तदा तदनुरोधेन पूर्वस्येति शेषषष्ठी। पूर्वसम्बन्धी विधिरित्यर्थः। विधिशब्दस्य विधेयमित्यर्थः। तथाच पूर्वोद्देश्यकं कार्यमित्यर्थः। अथवा पूर्वस्येति उभयत्र सम्बन्धसामान्ये शेषषष्ठ्यन्तमेवास्तु। तथाच पूर्वसम्बन्धि कार्यं, पूर्वसम्बन्धि विधानमित्यर्थः। पूर्वसम्बन्धि विधानमित्यत्र कर्तृक्रियाभावः सम्बन्धः। पूर्वस्य सतः कार्यान्तरविधाने - इति कर्मसाधनत्वे आशयः। पूर्वत्वेन असतः पूर्वत्वेन विधानं भावनम् इति भावसाधनत्वे आशयः। यथा आयन् इत्यत्र परनिमित्तकः इणो यणिति इकारस्य यकारादेशः स्थानिवत् इकारवत् स्यात् स्थानिभूतादचः (पूर्वत्वेन अविद्यमानस्य) पूर्वत्वेन आडागमस्य विधानं प्रति। तथाच आडागमः सिध्यति। पटयतीत्यत्र पट् णिच् अति इति स्थिते परनिमित्तक उकारलोपः पूर्वस्य पट् इत्यस्य वृद्धिविधिं प्रति स्थानिवत् भवति।

**शेखरे - अत एव ऐनेय इत्यादौ यस्येति च इति लोपे तस्य स्थानिवत्त्वात् सन्नियोगशिष्टन्याय प्राप्तनिवृत्तिप्रतिबन्धेन नकारस्थितिः।**

भावसाधनविधिशब्दे प्रमाणं फलं च दर्शयति। वर्णवाची एतशब्दः। ततः स्त्रियां वर्णादनुदात्तात्तोपधात् तो नः इति सूत्रेण ङीप्, तत्सन्नियोगेन तकारस्य नकारादेशश्च विहितः। एनी। एन्याः अपत्यमित्यर्थे स्त्रीभ्यो ढक् इति सूत्रेण एनीशब्दाद् ढकि तस्य आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् इति सूत्रेण एयादेशे एनी एय। आदिवृद्धौ

ऐनी एय। यस्येति च इति ईकारलोपे ऐन् एय। अत्र सन्नियोगशिष्टानामेकतरापाये अन्यतरस्याप्यपाय इति न्यायेन ङीप ईकारस्य लोपेन निवृत्तौ तत्सन्नियोगशिष्टस्य नकारस्यापि तकारत्वापत्तिः। पूर्वविधिशब्दे विधिशब्दस्य भावसाधनत्वस्वीकारात् परनिमित्तकः ईकारस्य लोपः स्थानिवत् स्यात् स्थानिभूतादचः पूर्वत्वेन नकारस्य भावं प्रति, तथाच ऐनेय इति सिध्यति।

**शेखरे - अत एव नपादन्तसूत्रे पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्र इति, लुकि न स्थानिवद् इत्यस्योदाहरणं दत्तं भाष्ये। अन्यथा तत्र पूर्वत्वेन दृष्टस्य सम्बन्धिनः कस्यचिद् विधेयस्याभावात् स्थानिवत्त्वाप्राप्तिरेवेति तदसङ्गतिः स्पष्टैव।**

अचः परस्मिन् पूर्वविधावित्यनेन विहितः स्थानिवद्भावः, न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु इत्यनेन निषिध्यते। तत्र वार्तिकम्- क्वि-लुक्-उपधात्व-चङ्परनिर्ह्रास-कुत्वेषूपसंख्यानम् इति।

क्वि-लुगादिविधावपि स्थानिवद्भावप्रतिषेधो वक्तव्य इति तदर्थः। लुकि कर्तव्ये परनिमित्तकस्य अजादेशस्य स्थानिवद्भावे सति दोषस्य पञ्चेन्द्रः दशेन्द्रः इत्युदाहरणं दत्तं भाष्ये। तथाहि- पञ्च इन्द्राण्यो देवता अस्येत्यर्थे सास्य देवता इति तद्धितार्थे विषये पञ्चन्शब्दस्य तद्धितार्थोत्तरपदसमाहारे च इति सूत्रेण द्विगुः। ततः तद्धिते अणि, पञ्चन् जस् इन्द्राणी जस् अण्। सुपो धातुप्रातिपदिकयोः इति सूत्रेण सुब्लुकि, द्विगोर्लुगनपत्ये इति सूत्रेण अणो लुकि नलोपः प्रातिपदिकान्तस्येति नलोपे आद्गुण इति गुणे च पञ्चेन्द्राणी। लुक्तद्धितलुकि इति ङीषो लुकि, ङीष्सन्नियोगेन विहितस्य आनुगागमस्य निवृत्तिरिष्यते। तथाहि-इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् इति सूत्रेण ङीष् आनुक् च विधीयेते। सन्नियोगशिष्टानामेकतरापाये अन्यतरस्याप्यपाय इति न्यायेन ङीषानुकौ सहैव भवतः। ङीषोभावे आनुगपि न

भवति। परन्तु परनिमित्तकस्य ङीष्लुकः पूर्वविधिं प्रति - आनुकः पूर्वत्वेन भावं प्रति - स्थानिवद्भावे सति आनुको निवृत्तिर्न भवेत्, श्रवणं प्रसज्येतेत्यर्थः। लुकि कृते न स्थानिवदिति वचनात्तु दोषो नास्ति। विधिशब्दस्य भावसाधनत्वाभावे हि पूर्वोद्देश्यकस्य कस्यापि कार्यस्य पञ्चेन्द्र इत्यत्राभावात् स्थानिवद्भावाभावात् निषेधोपि व्यर्थः स्यात्। कृतस्तु निषेधो भावसाधनत्वे प्रमाणम्।

**शेखरे- प्रकृतसूत्रेऽपि भाष्ये कर्मसाधनस्य विधिशब्दस्योपादाने न सर्वमिष्टं सङ्गृहीतमिति भावसाधनो विज्ञास्यते पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति स्थानिवत् इत्युक्तम्। तत्र भावसाधन इत्यस्य सोपीत्यर्थः।**

पूर्वविधिशब्दे तन्त्रमाश्रित्य कर्मसाधनभावसाधनयोः स्वीकारे भाष्यविरोधः। तथाहि कर्मसाधने सर्वेष्टसिध्यभावात् यथा सर्वेष्टसिद्धिः स्यात् तथा भावसाधन आश्रीयते इत्याशयः प्रतीयते। कैयटोऽपि भावसाधन एव व्यापकत्वादाश्रीयते इत्यवोचत्। एवं प्राप्ते नागेश आह - तन्त्रेण कर्मसाधनविधिशब्दस्यापि ग्रहणे भाष्यविरोधो वा कैयटविरोधो वा नास्ति। तथाहि - भावसाधनो विज्ञास्यते इति भाष्यस्य भावसाधनोऽपि विज्ञास्यते इत्यर्थः, कैयटेऽपि एव इत्यव्ययम् न अवधारणार्थे, किन्तु अप्यर्थे, अव्ययानामनेकार्थत्वात्। तथाच उभयोरपि तन्त्रेण सूत्रे ग्रहणमित्येव युक्तम्।

2.0 पूर्वत्वं व्यवहिताव्यवहितसाधारणम्

**शेखरे - पूर्वत्वञ्च व्यवहिताव्यवहितसाधारणम्। अव्यवहितग्रहणे मानाभावात्। स्वरे निषेधाच्च। तेन पटयतीति सिद्धम्।**

छन्दसि परेऽपि इत्युक्त्वा व्यवहिताश्च इति विशिष्य सूत्रितत्वात् पूर्वपरादिशब्दानाम् अव्यवहिते मुख्यतया वृत्तिरिति ज्ञातम्। तस्मिन्निति निर्दिष्टे

पूर्वस्य इत्यत्र निरन्तरोच्चारणार्थकनिर्दिष्टग्रहणाच्च व्यवहितेऽपि तेषां वृत्तिरस्तीति अवधारितम्। मथुरायाः पूर्वं पाटलिपुत्रमित्यादौ व्यवहितेऽपि पूर्वशब्दो लोके दृष्टः। अमीषां ब्राह्मणानामन्त्यात् पूर्वमानय इत्युक्ते तु अव्यवहितपूर्व एव लोके आनीयते। एवञ्च व्यवहिताव्यवहितसाधारणतया शास्त्रे लोकेऽपि प्रयोगदर्शनात् इह अचः परस्मिन्नित्यत्र पूर्वशब्देन व्यवहितस्यापि ग्रहणमस्ति वा उत अव्यवहितस्यैव ग्रहणम् इति संशयः। भाष्ये च - किं पुनरनन्तरस्य विधिं प्रति स्थानिवद्भावः आहोस्वित् पूर्वमात्रस्य इत्याशङ्क्य उभयोः पक्षयोः विशेषो विचारितः। व्यवहिताव्यवहितसाधारणतया पूर्वमात्रे पूर्वशब्दस्य सर्वत्र वृत्तिः। यत्र अव्यवहितपूर्वस्य ग्रहणमिष्यते तत्र यत्नः क्रियते। यथा तस्मिन्निति निर्दिष्टे इत्यत्र निर्दिष्टग्रहणात् अव्यवहितस्यैव ग्रहणम्। छन्दसि परेऽपीत्यत्र उत्तरांशविकलायाः तस्मादिति परिभाषाया उपस्थानात् अव्यवहितपूर्वार्थवृत्तितया व्यवहिताश्चेति पृथगुक्तम्। प्रकृते पूर्वविधावित्यत्र अव्यवहितपूर्वार्थकग्रहणे विशिष्य प्रमाणं नास्ति। किञ्च यदि अव्यवहितस्यैव ग्रहणं स्यात् तर्हि नपदान्तद्विर्वचन...इत्यत्र स्वरविधौ कर्तव्ये स्थानिवन्न इत्यंशो व्यर्थः स्यात्। तथाहि - कृधातोः सनि सन्यङोः इति द्वित्वे कृकृस इति स्थिते उरत् इति सूत्रेण अभ्यासऋकारस्य अकारादेशे रपरत्वे हलादिशेषे कुहोश्चुः इति चुत्वे सन्यतः इति इत्वे चिकृस इत्यत्र अज्झनगमां सनि इति ऋकारस्य दीर्घे ऋत इद्धातोः इति इत्वे रपरत्वे चिकिर् स। हलि च इति सूत्रेण दीर्घे आदेशप्रत्यययोः इति षत्वे च चिकीर्ष। अस्मात् ण्वुल्तृचौ इति सूत्रेण ण्वुलि युवोरनाकौ इति अकादेशे अतो लोप इत्यल्लोपे च चिकीर्ष् अक। इदानीं लिति इति सूत्रेण ण्वुलं निमित्तीकृत्य पूर्वस्य उदात्तः कर्तव्यः। तदा परनिमित्तकस्य अल्लोपस्य स्थानिवद्भावे सति ईकारस्य उदात्तस्वरो न सिध्येदिति नपदान्तसूत्रेण

स्थानिवद्भावनिषेध आरब्धः। यदि अव्यवहितपूर्वस्यैव विधौ स्थानिवद्भावः तर्हि ईकारस्य लोपस्थान्यकारात् पूर्वत्वाभावेन स्थानिवत्त्वाभावात् निषेधो व्यर्थः स्यात्। कृतस्तु निषेधो लिङ्गं व्यवहितपूर्वस्यापि ग्रहणे। पटयतीति व्यवहितपूर्वस्थले स्थानिवद्भावस्य फलम्।

**शेखरे - प्रकृते च द्वित्वनिषेधे स्थानिवत्त्वप्राप्तिः।**

प्रकृते - कौमुद्याम् इको यणचीति सूत्रस्य सुध्युपास्य इत्युदाहरणं दत्तम्। तत्र सुध् य् उपास्य इति स्थिते स्थानिवदादेश इति यकारस्य स्थानिवद्भावेन अच्त्वे अनचि च इति द्वित्वनिषेधः प्राप्नोति। परन्तु - अनल्विधौ इति स्थानिवद्भावनिषेधात् द्वित्वं प्रवर्तते। एवं स्थिते अचः परस्मिन् पूर्वविधौ इत्यनेन पुनः स्थानिवद्भावः। परनिमित्तको यणादेशः स्थानिवत् भवति पूर्वस्य धकारस्य द्वित्वनिषेधे कर्तव्ये इति। एवं सुध्युपास्य इत्यत्र धकारस्य अनचि च इत्यनेन द्वित्वनिषेधः प्रकृतः।

(शेखरे) द्वित्वनिषेधे - अचि परे द्वित्वं न स्यादिति प्रसज्यप्रतिषेधाश्रयणेन सूत्रार्थस्योक्तत्वात्।

**3.0 न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु**

1. **सूत्रार्थः** - पदान्तश्च द्विर्वचनञ्च वरे च यलोपश्च स्वरश्च सवर्णश्च अनुस्वारश्च दीर्घश्च जश् च चर् च -इति द्वन्द्वः। वरे इत्यत्र सप्तम्या अलुक् सौत्रः। विधिशब्दस्य प्रत्येकं सम्बन्धः। तथाच - क) पदान्तविधौ, ख) द्विर्वचनविधौ, ग) वरे-विधौ, घ) यलोपविधौ, ङ) स्वरविधौ, च) सवर्णविधौ, छ) अनुस्वारविधौ, ज) दीर्घविधौ, झ) जश्-विधौ, ञ) चर्-विधौ च कर्तव्ये परनिमित्तकः अच आदेशो न स्थानिवत् - इति सूत्रार्थः।

### 3.1 उदाहरणानि

क्रमेण –

**क) कानि सन्ति** - वाक्यसंस्कारे किम् जस् अस् लट् इति स्थिते जश्शसोः शिः इति सूत्रेण जसः शि इत्यादेशे किमः कः इति सूत्रेण किमः कादेशे क इ। नपुसकस्य झलचः इति सूत्रेण नुमागमे सर्वनामस्थाने चासम्बुद्धौ इत्युपधादीर्घे कानि इति लभ्यते। अस् लट् इत्यत्र झि-आदेशे झोन्त इति अन्तादेशे शपि, अदिप्रभृतिभ्यः शप इति लुकि अस् अन्ति। कानि अस् अन्ति इत्यत्र श्नसोरल्लोप इति सूत्रेण धातोरकारस्य लोपे कानि सन्ति। इदानीं परनिमित्तकः अयमकारलोपः स्थानिवत् स्यात् पूर्वस्य इकारस्य इको यणचीति यणादेशे कार्ये। तथाच यणादेशः प्राप्नोति। स च भवन् पदान्तः सम्पद्यत इति कृत्वा पदान्तविधौ स्थानिवद्भावनिषेधात् यणादेशो न भविष्यति।

**ख) सुद्ध्युपास्यः** - सुध् य् उपास्य इति स्थिते परनिमित्तकः यणादेशः ततः पूर्वस्य धकारस्य द्विर्वचनविधिं प्रति स्थानिवत् स्यादिति स्थानिवद्भावेन अच्त्वात् अनचि च इति निषेधात् धकारस्य द्विर्वचनं न सिध्येत्। द्विर्वचनविधौ स्थानिवद्भावनिषेधे तु यकारादेशस्य स्थानिवद्भावाभावात् द्विर्वचनं सिध्यति।

**ग) यायावरः** - याधातोः यङि सन्यङोः इति द्वित्वे याया य। यश्च यङः इति सूत्रेण यङन्तात् याधातोः वरच्। यायाय वर। अतो लोप इति सूत्रेण यङोकारस्य लोपे, लोपो व्योर्वलीति यकारलोपे च कृते - याया वर। अत्र वरे परे कृतस्य अकारलोपस्य स्थानिवद्भावे सति याया ((य्)अङ्)वर इत्यत्र अजादौ क्ङिति आतो लोप इटि च इत्यनेन विहित आकारलोपः प्राप्नोति। तथाच यायावर इति न सिध्येत्। वरे परे कृतस्य विधेः स्थानिवद्भावनिषेधे तु दोषो नास्ति।

**घ) कण्डूतिः** - कण्डूञ् इत्यस्माद् धातोः कण्ड्वादिभ्यो यक् इति यकि कण्डूय। सनाद्यन्ता धातव इति तस्य धातुसंज्ञायां ततः क्तिच्क्तौ च संज्ञायाम् इत्यनेन क्तिचि कण्डूय क्तिच् इति स्थिते अतो लोप इति अल्लोपे कृते परनिमित्तकस्य तस्य यकारलोपे कर्तव्ये स्थानिवद्भावे सति तकारपरकत्वेन लभ्यः लोपो व्योर्वलीति यलोपो न सिध्येत्। यलोपविधौ न स्थानिवदिति वचने तु यलोपः सिध्यति।

**ङ) चिकीर्षकः** - चिकीर्ष अक इत्यवस्थायाम् अतो लोप इत्यल्लोपे तस्य स्थानिवद्भावेन व्यवधायकत्वे सति ईकारस्य लिति इति सूत्रेण विहितः उदात्तस्वरो न सिध्येत्। स्वरविधौ न स्थानिवदिति वचने तु ईकारस्यैव उदात्तस्वरः सिध्यति।

**च) शिण्ढि** - शिष् धातोः लोटि मध्यमपुरुषैकवचने सिपि रुधादिभ्यः श्नम् इति श्नमि शि श्नम् ष् सिप् = शि न ष् सि। सेर्ह्यपिच्च इति ह्यादेशे शि न ष् हि। श्नसोरल्लोप इत्यकारलोपे कृते, शि न् ष् हि। हुझल्भ्यो हेर्धिः इति धित्वे शिन् ष् धि। ष्टुना ष्टुः इति धकारस्य ढकारे शिन् ष् ढि। झलां जश् झशि इति षकारस्य जश्त्वेन डकारे - शिन् ड् ढि। अत्र अल्लोपस्य स्थानिवद्भावे सति नकारस्य (अनुस्वारस्य ययि परसवर्णः) इति परसवर्णणकारादेशो न सिध्येत्। सवर्णविधिं प्रति न स्थानिवत् इति स्थानिवद्भावनिषेधेन स दोषो वार्यते।

**छ) शिंषन्ति** - शि श्नम् ष् झि इति स्थिते झोऽन्त इत्यन्तादेशे शि न ष् अन्ति इति जाते श्नसोरल्लोप इति सूत्रेण श्नमकारस्य लोपे तस्य स्थानिवद्भावे सति झल्परकत्वाभावात् नश्चापदान्तस्य झलि इति सूत्रेण विहितः अनुस्वारो न सिध्येत्। अनुस्वारविधिं प्रति न स्थानिवदिति वचनेन स दोषो वारितः।

**ज) प्रतिदीव्ना** - प्रतिपूर्वात् दिवुधातोः कनिन् प्रत्ययः। प्रतिदिवन्। ततः तृतीयैकवचने प्रतिदिवन् टा इत्यत्र अल्लोपोन इत्यकारलोपे कृते प्रतिदिव् न् आ इति

जाते परनिमित्तकस्य अल्लोपस्य स्थानिवद्भावे सति हल्परकत्वाभावात् र्वोरुपधाया दीर्घ इकः, हलि च इति विहितो दीर्घो न सिध्येत्। दीर्घविधौ स्थानिवद्भावनिषेधे तु इष्टं सिध्यति।

**झ) सग्धिः** - अदधातोः क्तिनि, बहुलं छन्दसीति घस्लादेशे घस् ति इत्यत्र गमहनजनखनघसां लोपः क्ङित्यनङि इति सूत्रेण उपधालोपे कृते घ् स् ति इत्यत्र झलो झलीति सलोपे घ् ति । झषस्तथोर्धोधः इति सूत्रेण तकारस्य धकारे घ् धि। अत्र उपधालोपस्य स्थानिवद्भावे सति झलां जश् झशि इति जश्त्वं न सिध्येत्। जश्विधौ स्थानिवद्भावनिषेधात्तु सिध्यति। ग्धिः। सहशब्दस्य समासे तस्य सादेशे सग्धिः।

**ञ) जक्षतुः** - लिट्यन्यतरस्यामिति सूत्रेण अदधातोः लिटि घस्लादेशे लिटः तसि, अतुसि लिटि धातोरनभ्यासस्य इति द्वित्वे घस् घस् अतुस्। हलादिः शेषः इति अभ्याससकारलोपे कुहोश्चुः इति घकारस्य चुत्वे झ घस् अतुस्। अभ्यासे चर्च इति जश्त्वे जघस् अतुस्। गमहनजनखनघसां लोपः क्ङित्यनङि इत्युपधालोपे कृते जघ् स् अतुस्। इण्कोः आदेशप्रत्यययोः इति षत्वे जघ् ष् अतुस्। अत्र उपधालोपस्य स्थानिवद्भावे सति घकारस्य खरि च इत्यनेन चर्त्वं न सिध्येत्। चर्विधौ स्थानिवद्भावनिषेधेन तु सिध्यति। जक् ष् अतुस् - जक्षतुः।

प्रकृते - सुध् य् उपास्यः इति स्थिते धकारस्य द्विर्वचननिषेधे कर्तव्ये यकारस्य स्थानिवद्भावाभावात् अच्परकत्वाभावात् द्विर्वचने सुध् ध् य् उपास्य इति।

## 4.0 सूत्रे द्विर्वचनसवर्णादिग्रहणस्य प्रयोजनम्

**शेखरे - अत्र द्विर्वचनसवर्णादिग्रहणं वतिघटितान्यातिदेशानां त्रिपाद्यामपि प्रवृत्तिबोधनार्थम्। तेन राम इत्यादौ विसर्गादिसिद्धिः।**

अचो रहाभ्यां द्वे , अनचि च इत्यादिद्विर्वचनविधिः त्रिपाद्यां विद्यते। झरो झरि सवर्णे - इति सवर्णविधिः, मोऽनुस्वारः, नश्चापदान्तस्य झलि -इति अनुस्वारविधिः, र्वोरुपधाया दीर्घ इकः, हलि च -इति दीर्घविधिः, झलां जश् झशि -इति जश्त्वविधिः, खरि च -इति चर्त्वविधिः च त्रिपाद्यां पठ्यन्ते। तेषां च स्थानिवद्भावसूत्रापेक्षया असिद्धत्वात् तेषु कर्तव्येषु अचः परस्मिन्नित्यस्य नास्ति प्रवृत्तिः। तथाच तदप्रवृत्त्यर्थं नपदान्तसूत्रे तयोरुपादानं किमर्थमिति प्रश्नः।

उच्यते - त्रैपादिकस्य असिद्धत्वादेव तत्र अचः परस्मिन्नित्यस्य अप्रवृत्तिः सिद्धा। सिद्धायाः तस्याः कीर्तनमेव ज्ञापयति वतिघटिताः अतिदेशाः त्रिपाद्यां प्रवर्तन्ते इति। तथाच स्थानिवत्सूत्राणामपि त्रिपाद्यां प्रवृत्तौ प्राप्तायाम् अचः परस्मिन्निति सूत्रस्य द्विर्वचनसवर्णानुस्वारदीर्घजश्चर्विधिषु प्रवृत्तिः प्रतिषिध्यते। तेन अन्यातिदेशानां त्रिपाद्यां सर्वत्र प्रवृत्तिरस्तीति, एतस्य च द्विर्वचनाद्यतिरिक्तविधिषु प्रवृत्तिरस्तीति च ज्ञायते। अचः परस्मिन् पूर्वविधौ इति स्थानिवद्भावः त्रिपाद्याम् एतेषु विधिष्वेव नास्ति। स्थानिवदादेश इत्यादीनां त्रिपाद्यां प्रवृत्तौ प्रयोजनं रामः इत्यादौ विसर्गादिसिद्धिः। तथाहि - राम सु इति स्थिते ससजुषो रुः इत्यनेन सकारस्य रु इत्यादेशः। राम रु। खरवसानयोर्विसर्जनीय इति सूत्रेण रेफान्तस्य पदस्य विधीयमाने विसर्गादेशे रामः इति सिध्यति। रामस् इत्यत्र विद्यमानं पदत्वं तदादेशे रामर् इति रेफान्ते स्थानिवदादेश इत्यतिदेशेन लभ्यते। वतिघटितानाम् अतिदेशानां त्रिपाद्यां प्रवृत्तिरस्तीति ज्ञापितार्थकथनपरे वाक्ये वतिघटितेति किमर्थमिति चेत्। अन्यथा-अन्तरेणापि वतिमतिदेशो गम्यते इति भाष्ये वर्तते। यथा अब्रह्मदत्तं ब्रह्मदत्त इत्याह, ब्रह्मदत्तवदिति गम्यते। असिद्धं बहिरङ्गमन्तरङ्गे इत्यदौ वतिं विना अतिदेश उच्यते। सिद्धस्य असिद्ध इति कथनेन असिद्धवदित्येवार्थः सम्पद्यते। अन्तादिवच्च, इष्टवच्च

इत्यादयो वतिघटिता अतिदेशाः। अन्तादिवच्च इत्यस्य त्रिपाद्यां प्रवृत्तौ क्षीरपेण इत्यादि फलम्। तथाहि - क्षीरप टा इति स्थिते टाङसिङसामिनात्स्याः इति सूत्रेण इनादेशे क्षीरप इन। आद्गुण इति गुणे क्षीरप् ए न। अत्र अन्तादिवच्च इत्यतिदेशप्रवृत्त्या एकारस्य पूर्वान्तवद्भावेन क्षीरपे इति एकाजुत्तरपदत्वमाश्रित्य विभक्तिनकारस्य णत्वे क्षीरपेण इति सिध्यति।

A Gateway to all Post Graduate Courses